तस्य किं दुर्लभं लोके स्वर्भूपातालमंडले ॥ विषं निर्विषतां याति पानीयममृतं भवेत् ॥ ४३ ॥ परसैन्यस्तंभनं स्यात्परकायप्रवेशनम् ॥ यंत्रराजे वशीभूते किं न सिद्ध्यति भूतले ॥ ४४ ॥ खेचरीमेलनं तस्य भचरीमेलनं भवेत् ॥ श्मशानेऽपि मृतो याति मोक्षमार्गं सनातनम् ॥ ४५ ॥ अथास्य साधनं वक्ष्ये तदिहैकमनाः शृणु ॥ यंत्रराजेन सिद्ध्यंति नात्र कार्या विचारणा ॥ ४६ ॥ अथास्य प्रयोगः— तत्रादौ चन्द्रताराादिबलान्विते सुमुहूर्ते सिद्धतीर्थे पर्वते वने वा जपस्थानं प्रकल्प्य नद्यादौ स्नात्वा नित्यनैमित्तिकं विधाय एकाकी कुशासने प्राङ्मुख उदङ्मुखो वा उपविश्य विश्वरूपं यंत्रराजं स्वहृदये विचिंतयेत् ॥ तथा च—मायाबीजांतरीभूतमज्ञानेन्धनदाहकम् ॥ भावनावशमापन्नः साक्षाद्यंत्रमयो भवत् ॥ १ ॥ इति संचिंत्य एकचित्तः स्थिरासनो मौनी—ॐ गुरवे नमः ॥ १ ॥ ॐ गणपतये नमः ॥ २ ॥ इति नत्वा प्रजापतिं प्रार्थयेत् ॥ तथाच--ॐ प्रजानाथ नमस्तेऽस्तु प्रजापालनतत्पर ॥ प्रसन्नो भव मे देव यंत्रसिद्धिं प्रयच्छ मे ॥ १ ॥ ये केचित्प्रेतकूष्मांडा भैरवा भूतनायकाः ॥ ते सर्वे विलयं यांतु प्रजानाथ नमोऽस्तु ते ॥ २ ॥ प्रयच्छ सिद्धिमतुलां यंत्रराजात्सुदुर्लभाम् ॥ त्वत्प्रसादादहं नाथ कृतकृत्यो व्रजे परम् ॥ ३ ॥ इति गिरिशं संप्रार्थ्य प्रसन्नचित्तो मौनी यंत्रं लिखेत् ॥ तथाच—चंदनागुरुकस्तुरीरक्तचंदनकर्पूरकुंकुमदेवदारुकुष्ठैरष्टगंधाभिधैर्जातीलेखन्या भूर्जपत्रे प्रसिद्धयंत्रे वा 'ॐ ह्रीं ॐ' इत्युच्चारणपूर्वकं नवकोष्ठांकितं कृत्वा प्रथममष्टौ नव तृतीयं पुनः द्वितयैकादशं पुनः दशवतःषष्ठाः इत्यंकान् 'ॐ ह्रीं ॐ' इत्युच्चारणपूर्वकं लिखेत् ॥ एवमेव विधिनाष्टोत्तरशतं यंत्राणि लिखित्वा नानापुष्पैः संपूज्य कृष्णागुरुधूपं च दत्त्वा पुष्पवासिततैलेन दीपं दद्यात् ॥ एवं यंत्रं संपूज्य पुनरपि दीपं प्रज्वाल्य पश्चिमाभिमुखं संस्थाप्य—ॐ भो भो जलेशवसन सर्वकार्यप्रसाधक ॥ निर्विघ्नं कुरु मे कार्यं हर विघ्नान्नमोऽस्तु ते ॥ १ ॥ इति वरुणं संप्रार्थ्य इमं दीपं वरुण तुभ्यमहं प्रददे ॥ इति दीपं दत्त्वा नानापुष्पैः संपूज्य यंत्राग्रे मूलमंत्रं जपेत् ॥ तथाच मंत्रो यथा—ॐ ह्रीं श्रीं क्लीं मम सर्ववांछितं देहि देहि स्वाहा ॥ इति सप्तदशाक्षरो मंत्रः ॥ अस्य विंशाकस्य यंत्रस्य ब्रह्मा ऋषिः । अनुष्टुप्छंदः । विंशांका भवानी देवता । ॐ बीजम् । ह्रीं शक्तिः । श्रीं कीलकं । चतुर्विधपुरुषार्थसिद्ध्यर्थे जपे विनियोगः ॥

ॐ ब्रह्मर्षये नमः शिरसि १। अनुष्टुप्छंदसे नमः मुखे २। विंशांकाभवानीदेवतायै नमः हृदि ३। ॐ बीजाय नमः गुह्ये ४। ह्रीं शक्तये नमः पादयोः ५। श्रीं कीलकाय नमः नाभौ ६। विनियोगाय नमः सर्वांङ्गे ७॥ इति विन्यस्य सहस्रसंख्यकं मंत्रं जपेत्॥ तद्दशांशेन क्षीरखण्डाज्यमधुना पंचामृतेनाक्तं पंचखाद्यं हुत्वा तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्यात्॥ अस्य पुरश्चरणं अष्टाशीतिदिनं यावत्॥ संख्यासमाप्तिदिवसे पृथक्पृथग्यंत्रं गोधूमान्नेन वर्टिं कृत्वा जले क्षिपेत्॥ मत्स्यस्य वटिकाभक्षणाद्वरुणस्तुष्यति रात्रौ वरं ददाति॥ एवं कृते यंत्रं सिद्धं भवति॥ एतस्मिन्सिद्धे यंत्रे मंत्री प्रयोगान् साधयेत्॥ तथाच-सिद्धतीर्थे गुरौ रम्ये सुसमे भूतले पुनः॥ नित्यं नैमित्तिकं कृत्वा सर्वसंगविवर्जितः॥ ४७॥ कुशासने समासीन एकचित्तः स्थिरासनः॥ ध्यानादिसंयतो मौनी नमस्कृत्य गुरुं हृदि॥ ४८॥ गणेशानं नमस्कृत्य प्रार्थयित्वा प्रजापतिम्॥ प्रसन्नचित्तो विलिखेल्लेखन्या जातिजातया॥ ४९॥ आदौ भूर्जे सिते पत्रे विलिखेदष्टगंधकैः॥ प्रणवं पूर्वमुच्चार्य मायाबीजं तु मध्यतः॥ ५०॥ विलिख्य यंत्रराजं तं पुनरंकांकितं चरेत्॥ धूपं दत्त्वा महेशानि कृष्णागुरुसमुद्भवम्॥ ५१॥ पुष्पवासिततैलेन दीपं दद्यात्प्रयत्नतः॥ पश्चिमाभिमुखं दीपं जलेशाय निवेदयेत्॥ ५२॥ नानापुष्पैः प्रपूज्याथ यंत्रमष्टोत्तरं शतम्॥ जप्यं सहस्रमेकं च हवनं तद्दशांशतः॥ ५३॥ क्षीरखण्डाज्यमधुना तथा पंचामृतेन च॥ पंचखाद्येन जुहुयादर्धरात्रे तु पार्वति॥ ५४॥ संपूर्णतर्पणं चात्र कृत्वा रात्रौ वरप्रदम्॥ नास्य ध्यानं न वा पूजा न न्यासो नास्य भावना॥ ५५॥ जपादस्य भवेत्सिद्धो यंत्रराजस्त्रिवर्गदः॥ तावल्लिखेद्यंत्रराजं यावत्संख्या समाप्यते॥ ५६॥ अष्टाशीतिदिने देवीं पूजयित्वा विसर्जयेत्॥ पुनर्गोधूमचूर्णेन वेष्टयित्वा जले क्षिपेत्॥ ५७॥ मत्स्यैस्तु भक्षणादस्य वरुणस्तेन तुष्यति॥ मौनं च ब्रह्मचर्यं च भूशय्यां तावदाचरेत्॥ ५८॥ गोधूमचूर्णघटितं तैलपक्वं प्रभक्षयेत्॥ न घृतं भक्षयेत्तावद्यावद्यंत्रं समाप्यते॥ ५९॥ एवं कृतपुरश्चर्यः साक्षाद्ब्रह्ममयो भवत्॥ वशीभूते यंत्रराजे प्रयोगे कुशलो भवेत्

१ तंत्रांतरेऽपि-विलिखेद्यंत्रराजं तं भूर्जे वा कागदेऽथवा। वामादिक्रममारभ्य नवकोष्ठानि पूरयेत्॥ २ तंत्रांतरेऽपि-विलिखेद्यंत्रराजं तं त्रिसहस्रं समांशतः॥ अनया संख्यया देवि चत्वारिंशद्दिनं लिखेत्॥

॥ ६० ॥ अथ प्रयोगो यथा—आसने तु पवित्रे च नित्यं संध्यात्रयेषु च ॥ पंचशतं च यंत्राणि कृत्वा वारि विसर्जयेत् ॥
॥ ६१ ॥ अतिमत्स्यं समादाय रक्षणीयं स्वनामतः ॥ सर्वसिद्धिकरः साक्षाद्राजते नात्र संशयः ॥ ६२ ॥ अन्यत्—लिखित्वा
यंत्रराजं तु नूत्ने कुलालखर्परे ॥ आक्रम्य वामपादेन कृत्वा तं चाप्यधोमुखम् ॥ ६३ ॥ प्रजपेन्मंत्रराजं तमष्टोत्तरशतं
सुधीः ॥ ॥ तत्र मंत्रः—ॐ ह्रीं श्रीं क्लीं अमुकमाकर्षय २ स्वाहा ॥ चक्रवर्तिनमप्याशु मुहूर्तेन स्वमालयम् ॥ ६४ ॥ आन
येत्प्रहरार्धेन भूचरान्यक्षराक्षसान् ॥ यामेनैकेन देवेशि पाकशासनमासनात् ॥ ६५ ॥ चालयेन्नात्र संदेहो वरुणं धननायकम् ॥
दिक्पालान् विदिशापालान् यामेनैकेन सुव्रते ॥ ६६ ॥ देवकन्या यक्षकन्या अप्सरोमंडलानि च ॥ ध्रुवमाकर्षयेद्देवि यक्षराक्षस
पन्नगान् ॥ ६७ ॥ यावद्धनं लिखेद्यंत्रे तावदाकर्षणं भवेत् ॥ नगरग्रामभवापीकपपर्वतसागरान् ॥ ६८ ॥ वनानि देवदेवेशि सद्य
आकर्षयन्नरः ॥ किमन्यज्जगदाधारे लोकत्रयमिदं पुनः ॥ ६९ ॥ विपरीतं कर्तुकामो दिनैनैकेन साधयेत् ॥ धनधान्यगजाश्वांग
सेनाद्याकर्षणं भवेत् ॥ ७० ॥ आकर्षणे वशीकार एक एव विधिर्मतः ॥ असाधितमपि ह्येतल्लिखेत्तु नित्यदा निशि ॥ ७१ ॥ अष्टो
त्तरशतं देवि वशयेदखिलं जगत् ॥ वश्यकामस्तु देवेशि क्षीरेण सह भक्षयेत् ॥ ७२ ॥ यस्य नाम्ना यंत्रराजं स वश्यो जायते
क्षणात् ॥ नृपो नृपेन्द्रो गंधर्वो देवो देवांगनापि वा ॥ ७३ ॥ वशीभूतो वशंत्याशु साधकस्य हि किंकराः ॥ बहुना किमिहोक्तेन
मां विष्णुं वा वशं नयेत् ॥ ७४ ॥ अन्यत्—लिखित्वा यंत्रराजं तु शत्रुनाम ततो लिखेत् ॥ मनुना वेष्टितं देवि शत्रुनाम जपे
त्सुधीः ॥ ७५ ॥ अग्नौ प्रतापिते रागो दाहो लूतादिसंभवः ॥ दग्धे यंत्रे महेशानि सद्यो मृत्युमवाप्नुयात् ॥ ७६ ॥ इन्द्रोऽपि
किमुतान्यो वा मलमूत्रधरो नरः ॥ ७७ ॥ अन्यत्—उच्चाटनं महादेवि शृणुष्वावहितानघे ॥ उच्चाटने मरुद्बक्रो विद्वेषे राक्षसाननः ॥
॥ ७८ ॥ प्रागाननोऽपि वृद्धौ स्यादन्येष्टीशानदिङ्मुखः ॥ धत्तूररससंमिश्रमषीभिः क्रोधमुद्वहन् ॥ ७९ ॥ वात्यायां निक्षिपेद्यंत्रं
श्मशाने गहने वने ॥ विभीततरुशाखायामथवा बंधयेच्छिवे ॥ ८० ॥ सद्य उच्चाटयेत्स्थानादिन्द्रेणापि सुरक्षितम् ॥ ८१ ॥ अन्यत्—

स्तंभनं संप्रवक्ष्यामि शृणुष्वैकाग्रचेतसा ॥ हरिद्रारससंमिश्रैर्लवणैर्भूर्जपत्रके ॥ ८२ ॥ लिखित्वा निखनेद्गर्ते सपल्लवमनुं स्मरन् ॥ उप
र्यधः शिलां दत्त्वा यदा संताडथ संस्थितः ॥ ८३ ॥ यस्य नाम्ना जपेन्मंत्रं तं तं स्तंभयति क्षणात् ॥ रवेर्गतिं स्तंभयति स्तंभयत्येव
मारुतम् ॥ ८४ ॥ नदीं च वर्षाकालीनां मेघं सिंधुं हुताशनम् ॥ नक्षत्रगतिसंचारान् विमानं द्युसदामपि ॥ ८५ ॥ वाणीस्तंभं
गतिस्तंभमुत्पातस्तंभनं तथा ॥ शत्रुसेनास्तंभनं च शक्तिस्तंभं दिवौकसाम् ॥ ८६ ॥ प्रकुर्यात्प्राणनिलये मनसः स्तंभनादिकम् ॥
बहुना किमिहोक्तेन त्रैलोक्यं स्तंभयेत्क्षणात् ॥ ८७ ॥ अन्यत्—अथातः संप्रवक्ष्यामि विद्वेषं प्राणवच्छृणु ॥ उलूकपक्षलेखन्या
श्मशानकर्पटे लिखेत् ॥ ८८ ॥ यंत्रं कमलपत्राक्षि सपल्लवमनुं जपेत् ॥ आक्रम्य वामपादेन यंत्रयुग्मं विनायकम् ॥ ८९ ॥ इन्द्राग्नि
नैर्ऋतयमवरुणादिकृतामपि ॥ मैत्रीं विनाशयेत्क्षिप्रं किमुतान्यमहीभुजाम् ॥ ९० ॥ लोपामुद्रागस्त्ययोश्च अरुंधतिवसिष्ठयोः ॥ वाणी
विधात्रोरपि वै मैत्री सापि क्षयं व्रजेत् ॥ ९१ ॥ यक्षराक्षसवेतालगंधर्वोरगरक्षसाम् ॥ द्वेषः स्यान्नात्र संदेहः स्वर्भूपातालवासिनाम् ॥
॥ ९२ ॥ अन्यत्—शांतिकर्म क्षमाधारे प्रवक्ष्ये जगदीश्वरि ॥ शांतिकामो लिखित्वाऽमुं यंत्रराजं त्रिवर्गदम् ॥ ९३ ॥ तत्पल्लव
युतं मंत्रं प्रजपेत्त्रिसहस्रकम् ॥ एवं कृते रोगशांतिः कृत्याद्रोहादिशांतिकम् ॥ ९४ ॥ मनःशांतिर्मोहशांतिः कामक्रोधादिशांतिकम् ॥
कारागारादिमोक्षश्च दुर्भिक्षादिनिवारणम् ॥ ९५ ॥ भवेदेव न संदेहस्त्रैलोक्यशांतिकामनाः ॥ प्रोक्तं प्रयोगषट्कं ते सुंदरि प्राण
वल्लभे ॥ ९६ ॥ कल्पनादेव जायंते सिद्धयो नात्र संशयः । त्यक्त्वा सर्वफलासंगं लभेन्मुक्तिं चतुर्विधाम् ॥ ९७ ॥ नास्य मोहं प्रज
नयेद्विभूतिः सर्वसंपदाम् ॥ अणिमाद्यष्टसिद्धीनां नास्य मोहः प्रजायते ॥ ९८ ॥ न तस्य तृट्काममोहक्रोधाहंकारसंभवः ॥ दवरपि
स सेव्यः स्यात्किमुतान्यैर्नराधिपैः ॥ ९९ ॥ दद्यादसाधितोऽप्येष लेखनाच्छिवमूर्जितम् ॥ अनेकजन्मपुण्येन यंत्रमेतच्छुचिस्मिते ॥
॥ १०० ॥ सम्प्राप्य साधयेद्यत्नाजीवन्मुक्तिमभीप्सुकः ॥ चिंतामणिर्यथा भूमौ कल्पवृक्षो यथा दिवि ॥ १०१ ॥ रसातले
निधिर्यद्वत्तथा यंत्रमपीश्वरि ॥ अनेन यंत्रराजेन यदसाध्यं सुरेश्वरि ॥ १०२ ॥ तन्नास्ति जगदीशानि स्वर्भूपातालमंडले ॥ मनसा

भावयेन्मंत्री यंत्रराजं त्रिवर्गदम् ॥ १०३ ॥ भावनादेव सिद्धिः स्यान्नात्र कार्या विचारणा ॥ इति ते गदितो देवि जीवन्मुक्तिफल क्रमः ॥ १०४ ॥ कामनां प्राप्य निष्कामो मोक्षलक्ष्मीं स गच्छति ॥ १०५ ॥ इति विश्वलोकतंत्रे **नवकोष्ठांकिताविंशांकयंत्रविधानं** समाप्तम् ॥ अथ विंशांकयंत्राणामनेकरूपाणि ॥


८	२	१०
९	७	४
३	११	६


२	९	२	७
६	३	६	५
८	३	८	१
४	५	४	७


६	८	२	४
४	२	८	६
८	६	४	२
२	४	६	८


१	८	३	८
५	६	३	६
७	२	१	२
७	४	५	४


४	२	८	६
६	८	२	४
२	४	६	८
८	६	४	२














॥ अथ पंचदशीविधानप्रारंभः ॥ कैलासशिखरासीनं गौरी पृच्छति शंकरम् ॥ पंचदशविधिं कृत्वा भक्तानां हितकारकम् ॥ १ ॥ श्रीपार्वत्युवाच ॥ स्वामिन्भो देवदेवेश लोकनाथ जगत्प्रभो ॥ यत्किंचित्स्मर्यंते सद्यस्तत्सर्वं वद शंकर ॥ २ ॥ कलौ नरा भविष्यंति मंदभाग्या दरिद्रिणः ॥ तेषां भोगादिसंसिद्धिर्भवेद्येन वदस्व तत् ॥ ३ ॥ श्रीमहादेव उवाच ॥ साधु पृष्टं महादेवि हिताय जगतां त्वया ॥ प्रायः प्रश्नो हि साधनां नराणां सुखदो भवेत् ॥ ४ ॥ शृणु भद्रे शुभां वार्तां कौतुकीं विधिसंभवाम् ॥ योगा नानाविधाः सन्ति तन्मध्ये यंत्रसंभवः ॥ ५ ॥ अथातः संप्रवक्ष्यामि सुंदरीयंत्रमुत्तमम् ॥ यस्य विज्ञानमात्रेण त्रैलोक्ये विजयी भवेत् ॥ ६ ॥ धर्मेण लभते देवि न क्रयेण कदाचन ॥ दक्षिणावर्तशंखश्च तथा रुद्राक्ष एव च ॥ ७ ॥ रामलक्ष्मणनिष्ठा तु तथैवं सुयशो भवेत् ॥ तादृग्विधमिदं यंत्रं चतूरेखात्मकं शुभम् ॥ ८ ॥ यस्य तुष्टा भवेद्देवि वरा लक्ष्मीर्वरात्मिका ॥ तेनैव लभ्यते देवि सत्यं सत्यं वचो

मम ॥ ९ ॥ गुह्याद्गुह्यतरं दवि न देयं यस्य कस्यचित् ॥ तस्य संग्रहमात्रेण सर्वसिद्धिर्वरानने ॥ १० ॥ न जपो न तपो मंत्रो न च यज्ञो न पूजनम् ॥ तस्मात्सिद्धिकरं ज्ञेयं लिखित्वा शुचिमानसः ॥ ११ ॥ सर्वाभीष्टफलं कुर्यात्तुर्यधाम लिखेत्सुधीः ॥ नवग्रहात्मकं यंत्रं योगिनीनवनाथयोः ॥ १२ ॥ नवखण्डग्रहे ज्ञेयं विषमांके शिवोदितम् ॥ नवखण्डमयी पृथ्वी प्रोच्यते मुनिपुंगवैः ॥ तस्माच्च नवकोष्ठेषु यंत्रं चैव प्रजायते ॥ १३ ॥ मथा संकीलिताश्चान्ये यंत्रमंत्रा न सिद्धिदाः ॥ इदं सङ्गोपितं सुभ्रु यंत्रं मे करुणात्मना ॥ १४ ॥ नैतत्तुल्यं जगत्स्वम्ब यंत्रं मंत्रः स्वसिद्धिदः ॥ स्वगुह्यमिव संगोप्यं कथनीयं न कस्यचित् ॥ १५ ॥ तवातिस्नेहबाहुल्यात्कथयिष्ये तवाग्रतः ॥ नाभक्ताय त्वया देयं कृतघ्नाय कदाचन ॥ १६ ॥ श्रीपार्वत्युवाच ॥ यथा कथयसे देव करिष्येऽहं तथा शिव ॥ आज्ञामज्ञानतिमिरच्छिदुष्णकर सत्पते ॥ १७ ॥ श्रीमहादेव उवाच ॥ सर्वसिद्धिकरं चैव यंत्रोद्धारं शृणु प्रिये ॥ यंत्रवर्यमिदं भद्रे पूर्वपुण्येन लभ्यते ॥ १८ ॥ तुर्यरेखाः प्रकतव्यास्तिर्यगूर्ध्वं च संख्यया ॥ नवधा कामसंकेतो नवकोष्ठात्मके प्रिये ॥ १९ ॥ तत्रांकगतियोगेन हयमारभ्य पार्वति ॥ गतिमार्गक्रमेणैव नव यन्त्राणि कारयेत् ॥ २० ॥ एकादिरंध्रपर्यंतं तत्रांकांस्तु प्रवेशयेत् ॥ एतस्य सकलं वाक्यं शृणु यत्नेन साम्प्रतम् ॥ २१ ॥ अन्यत्रापि–सूर्येन्दुभौमैर्बुधदेवपज्य शुक्रैः शनौ राहुशिखिक्रमेण ॥ अश्वैर्गजैर्मंत्रिगतैश्च वामैः पुनश्च रोगैर्गत अश्वभौमे (?) ॥ २२ ॥ श्रीपार्वत्युवाच ॥ त्वदीयमद्भुतं वाक्यं श्रुतं देवेश शर्मदम् ॥ यंत्रस्य देवतां ब्रूहि कथं कविवरो भवेत् ॥ २३ ॥ श्रीमहादेव उवाच ॥ पुरा रामायणे रामो रावणं दशकंधरम् ॥ हंतुं जगाम जलधेस्तीरेऽतिष्ठत्सवानरः ॥ २४ ॥ जलधेस्तरणे यत्नं चिंतयामास सर्वदृक् ॥ तदा न कोऽपि चायातो यत्नो मनसि पार्वति ॥ २५ ॥ भूयः समाधिना चित्तं संनियम्य रघूत्तमः ॥ दध्यौ चिरं स्मृतं तस्माद्यंत्रमेकं शृणुष्व तत् ॥ २६ ॥ यन्मया गोपितं कांते यंत्रं पंचदशाख्यकम् ॥ सर्वापत्तारकं सुभ्रु सर्वसिद्धिविधायकम् ॥ २७ ॥ यावंतोऽकाश्च लोकेऽस्मिन् यंत्रेषु परमेश्वरि ॥ तावंतोऽस्मिन्महायंत्रे सर्वे एव वसंति हि ॥ २८ ॥ सङ्गोपितं स विज्ञाय यंत्रं ध्यानेन राघवः ॥ यत्साधनाबहं

जातो विश्वसंहरणक्षमः ॥ २९ ॥ वायुपुत्रं तदा रामः प्रेषयामास सत्वरम् ॥ ममांते स समागत्य मनोजव उदारधीः ॥ ३० ॥ प्रार्थयामास रामस्य पाथोधितरणाय वै ॥ तदालिख्य मया यंत्रं दत्तं वै वायुसूनवे ॥ ३१ ॥ सत्वरं स ददौ यंत्रं रामाय नररूपिणे ॥ रामस्तदनुभावेन सिंधौ सेतुं बबंध ह ॥ ३२ ॥ सेतुबंधे शिवं तत्र स्थापयामास राघवः ॥ वर्तते स शिवोऽद्यापि तत्र सर्वाघनाशनः ॥ ३३ ॥ यंत्रं भूमौ विलिख्याथ वायुसूनुकरे ददौ ॥ स यत्नात्स्थाप्य जलधौ तारयामास पावनिः ॥ ३४ ॥ निस्तीर्य सेतुना तेन सागरं मकरालयम् ॥ परं पारं जगामाथ लंकेशमहनत्सुधीः ॥ ३५ ॥ एतस्माद्धनुमान्देवो जातो यन्त्रस्य पार्वति ॥ रामेणापि वरो दत्तो यंत्रेशस्त्वं भविष्यसि ॥ ३६ ॥ तदा ह्येतस्य यन्त्रस्य ख्यातिर्लोके मनोरमे ॥ विधिं केऽपि न जानंति शृणु तस्माच्छिवप्रिये ॥ ३७ ॥ आदौ कुर्यात्पुरश्चर्य्यां साधकः सिद्धिहेतवे ॥ पुरश्चरणहीनस्य यंत्रसिद्धिर्न जायते ॥ ३८ ॥ जीवहीनो यथा देही सर्वकर्मसु न क्षमः ॥ पुरश्चरणहीनो हि तथा यंत्रे प्रकीर्तितः ॥ ३९ ॥ पुरश्चर्याविधिः प्रोक्तस्ते पुरैव सुमध्यमे ॥ प्रयोगांस्तु शृणुष्वाथ यंत्रविद्याविधानतः ॥ ४० ॥ अथास्य प्रयोगः—हस्तार्कपुष्यार्कमूलार्कश्रवणयुक्ते स्वकीयवारे सुमुहूर्ते विविक्ते देशे सिद्धपीठादिभूमिं प्रकल्प्य कुशासनोपरि रक्तासनमास्तीर्य रक्तवस्त्रं रक्तमालां च परिधाय प्राङ्मुख उदङ्मुखो वा उपविश्य भूतशुद्ध्यादिकं च कृत्वा आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम पंचदशांकयंत्रलेखनार्थं सर्वविघ्ननिवारणार्थं च भूतलिपिमंत्रजपं करिष्ये इति संकल्प्याष्टोत्तरशतवारं भूतलिपिं जपेत् ॥ तत्र मंत्रः—ॐ अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं ॥ इति भूतलिपिं जप्त्वा पश्चादौदुंबरवृक्षस्य पर्णांगुललेखन्या वा ज्ञानवृक्षस्य जासवंदस्य जातिसंज्ञकस्य पलाशस्य वा लेखन्याष्टांगुलप्रमाणया क्षीरवृक्षपट्टोपरि कुंकुमेन नवकोष्ठांकितं कृत्वा अंकं पूरयेत् ॥ तथा च—

---

१ तंत्रांतरेऽपि—शुभे चन्द्रे सुनक्षत्रे निजवारे विचक्षणः । आदावारंभणं कुर्यात्स्वजनस्य समाश्रयात् ॥ २ तत्रांकगतियोगेन हयमारभ्य पार्वति । गतिमार्गक्रमेणैव नव यन्त्राणि कारयेत् ॥ एकादिरंध्रपर्यन्तं तत्रांकांस्तु प्रवेशयेत् । एतस्य सकलं वाक्यं शृणु यत्नेन साम्प्रतम् ॥ तंत्रांतरेऽपि—सूर्येन्दुभोमैर्बुधदेवपूज्यशुक्रैः शनौ राहुशिखिक्रमेण । अश्वैर्गजैर्मत्रिगतैश्च वामः पुनश्च रोगैर्गत अश्वभौमे ॥ सर्वत्र यंत्रकी चाल एकसे लेकर नवतक,है परन्तु एक महापुरुषका ऐसा कथन है कि पहले १ पीछे ५ पीछे ९ तदनंतर ८–३–४ तदनंतर २–७–६ इस प्रकार भरना चाहिये ॥

पूर्वे १ नैर्ऋत्ये २ सौम्ये ३ वायव्ये ४ मध्ये ५ आग्नेये ६ याम्ये ७ शैवे ८ वारुणे ९ इति क्रमेण ह्येकमारभ्य पूरयेत् ॥ ततः "ॐ भद्रेश्वर भद्रं पूरयर पूरय स्वाहा॥" इति भद्रेश्वरमंत्रेणावाहनादिषोडशोपचारैः संपूज्य तदग्रेऽष्टोत्तरशतवारं भद्रेश्वरमंत्रं जपेत् ॥ तथाच–अस्य भद्रेश्वरमंत्रस्य स्वर्णाकर्षण भैरव ऋषिः। विराट् छंदः। भद्रेश्वरो देवता। ह्रीं बीजम्। भद्रं शक्तिः। पूरयेति कीलकम्। भद्रेश्वरप्रीतये जपे विनियोगः ॥ ॐ स्वर्णाकर्षणभैरवाये नमः शिरसि १। विराट्छंदसे नमः मुखे २। भद्रेश्वरदेवतायै नमः हृदि ३। ह्रीं बीजाय नमो गुह्ये ४। भद्रं शक्तये नमः पादयोः ५। पूरयेति कीलकाय नमः नाभौ ६। विनियोगाय नमः सर्वाङ्गे ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ भद्रेश्वर अंगुष्ठाभ्यां नमः १। भद्रं तर्जनीभ्यां नमः २। परय मध्यमाभ्यां नमः ३। भद्रेश्वर अनामिकाभ्यां नमः ४। भद्रं कनिष्ठिकाभ्यां नमः ५। परय करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ भद्रेश्वर हृदयाय नमः १। भद्रं शिरसे स्वाहा २। पूरय शिखायै वषट् ३। भद्रेश्वर कवचाय हुं ४। भद्रं नेत्रत्रयाय वौषट् ५। पूरय अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कृत्वा भद्रेश्वरं ध्यात्वा "ॐ भद्रेश्वर भद्रं पूरय पूरय स्वाहा". इति मंत्रमष्टोत्तरशतवारं जपेत् ॥ इति जपं कृत्वा एकाद्यंकक्रमेण नवदुर्गा नवग्रहान् इन्द्रादीन् वज्रादींश्च संपजयेत् ॥ तथाच–प्रथमाङ्के ॐ शैलपुत्र्यै नमः १। द्वितीयांके ॐ ब्रह्मचारिण्यै नमः २। तृतीयांके ॐ चन्द्रघंटायै नमः ३। चतुर्थांके ॐ कूष्माण्डायै नमः ४। पंचमांके ॐ स्कंदमात्रे नमः ५। षष्ठांके ॐ कात्यायन्यै नमः ६। सप्तमांके ॐ कालरात्र्यै नमः ७। अष्टमांके ॐ महागौर्यै नमः ८। नवमांके ॐ सिद्धिदात्र्यै नमः ९ ॥ एवम् ॐ आदित्याय नमः १। ॐ चन्द्रमसे नमः २। ॐ भौमाय नमः ३। ॐ बुधाय नमः ४। ॐ जीवाय नमः ५। ॐ शुक्राय नमः ६। ॐ शनैश्चराय नमः ७। ॐ राहवे नमः ८। ॐ केतवे नमः ९ ॥ पुनः ॐ इन्द्राय नमः १। ॐ अग्नये नमः २। ॐ यमाय नमः ३। ॐ निर्ऋतये नमः ४। ॐ वरुणाय नमः ५।

पूर्व

ईशान	८	१	६	आग्नेय
उत्तर	३	५	७	दक्षिण
वायव्य	४	९	२	नैर्ऋत्य

वरुण

ॐ वायवे नमः ६ । ॐ कुबेराय ननः ७ । ॐ ईशानाय नमः ८ । नवमांके ॐ ब्रह्मणे नमः ९ । ॐ अनंताय नमः १० ॥ पुनः ॐ वज्राय नमः १ । ॐ शक्तये नमः २ । ॐ दंडाय नमः ३ । ॐ खड्गाय नमः ४ । ॐ पाशाय नमः ५ । ॐ अंकुशाय नमः ६ । ॐ गदायै नमः ७ । ॐ त्रिशूलाय नमः ८ । नवमांके ॐ पद्माय नमः ९ । ॐ चक्राय नमः १० ॥ इति पजयेत् ॥ ततः "ॐ भद्रेश्वराय नमः ॥" इति भद्रेश्वरं संपूज्य कृष्णागुरुधूपं दत्त्वा सुगंधतैलेन घृतेन वा दीपं प्रज्वाल्य गुडान्नेन नैवेद्यं समर्प्य नमस्कारं कृत्वा विलिखेत् ॥ पुनः द्वितीये तदेव लेखनीयं पुनरपि भद्रेश्वरमंत्रमष्टोत्तरशतं जपेत् ॥ पुनरपि नियमेन लेखनीयमेवं पंचदशसहस्रास्सिद्धिर्भवति ॥ एतस्मिन्सिद्धे यंत्रे कागदे भूर्जपत्रे वा लिखित्वा तदग्रे भद्रेश्वरमूलमंत्रं पंचदशसहस्रं जपेत् ॥ तद्दशांशेन करवीरपुष्पहोमः ॥ तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्यात् ॥ पश्चाद्यंत्रं त्रिलोहमृदंगे क्षिप्त्वा कंठे वा दक्षिणे करे धारयित्वा ततः प्रयोगान् मनोऽभीप्सितान् कुर्यात् ॥ तथाच शिवरहस्ये—हस्तार्कपुष्यमूले तु शुचिर्भूत्वा समाहितः ॥ चंपकस्य च लेखन्या शुद्धयंत्रं लिखेत्सुधीः ॥ ॥ १ ॥ पंचदशहसहस्राणि क्षीरवृक्षस्य पट्टके ॥ ततः सिद्धं भवेद्यंत्रं धारयेत्साधकोत्तमः ॥ २ ॥ कंठे वा दक्षिणे बाहौ प्रयोगानाचरेत्ततः ॥ ततो यथोक्तं लभते फलं यंत्रस्य निश्चितम् ॥ ३ ॥ पुरश्चर्यां विना चाथ यः कश्चित्सिद्धिमिच्छति ॥ स चक्षुषा विना रूपं दर्पणे द्रष्टुमिच्छति ॥ पुरश्चरणसंपन्नः प्रयोगानथ कारयेत् ॥ ४ ॥ अथ प्रयोगः ॥ तत्रादौ वर्णभेदेन वारभदः—गुरौ शुक्रे तु विप्राणां कुजार्कौ क्षत्रियस्य च ॥ बुधो हि शूद्रवर्णस्य सोमो वैश्यस्य कीर्तितः ॥ ५ ॥ म्लेच्छस्य शनिवारः स्याल्लिखित्वा दीयते यदि ॥ तदा शुभफलं तस्य जायते नात्र संशयः ॥ ६ ॥ राजा हि रविवारे स्याद्धस्तपुष्यसमान्विते ॥ श्रवणे मूलसंयुके व्यतीपातादिवर्जिते ॥ ७ ॥ अथ कार्यपरत्वेन दीपमाह—राजवश्ये धनाप्तौ च स्थापयेदुत्तरामुखम् ॥ उच्चाटने च मरणे दीपं दक्षिणसम्मुखम् ॥ ८ ॥ कर्तव्यं विधिवत्पुंसां प्रयोगाणां च सिद्धये ॥ धनाप्तौ वश्यकार्ये च गोघृतं दीपके न्यसेत् ॥ उच्चाटने मारणे च

१ तंत्रांतरेऽपि-पूर्वविद्यां पंचदशीं लक्षमात्रं जपेद्यदि ॥ ततो यंत्रं प्रकुर्वीत फलभागी ततो भवेत् ॥ अन्यत्रापि-खपाद्रं लक्षमेकं वै पुरश्चरणमुच्यते ॥

सार्षपं राजिकाभवम् ॥ ९ ॥ अथ वर्णभेदेन पत्रभेदः—ब्राह्मणो विलिखेद्भूर्जे ताडपत्रे तु भूमिभृ ॥ वैश्यस्तु विलिखेद्देवि कागदे सर्वसिद्धये ॥ १० ॥ शूद्रो हि विलिखेद्देवि भूमिभागे प्रयत्नतः ॥ यवनस्यापि कथितः कागदस्तु मया तव ॥ ११ ॥ अथ कार्यपरत्वेन लेखनीमाह—अश्वत्थया लिखेच्छांतौ वैश्ये जातिभवा मता ॥ स्वर्णया विलिखेद्यत्नान्मोहनार्थं स्वासिद्धये ॥ १२ ॥ रौप्यया विलिखेद्यत्नात्सर्वाकर्षणसिद्धये ॥ काकपक्षस्य लेखन्या मोहनार्थं लिखेद्विधौ ॥ १३ ॥ स्तंभनार्थं तु विलिखेल्लेखन्या तु हरिद्रया ॥ विपाशया तु लेखन्या ताम्रया वा विधीयते ॥ १४ ॥ उच्चाटने द्वेषणादौ लोहया संलिखेत्सदा ॥ लेखन्या लक्षणं देवि प्रोक्तमष्टांगुलं यतः ॥ पंचतत्त्वक्रमेणैव पंच कार्याणि साधयेत् ॥ १५ ॥ अथ कार्यपरत्वेन गंधमाह—आरक्तेनैव विलिखेद्वशीकरणसिद्धये ॥ कस्तूर्या विलिखेद्देवि स्वर्णाकर्षणसिद्धये ॥ १६ ॥ हरिद्रया तु विलिखेत्सर्वस्तंभनकर्मणि ॥ केसरेण लिखेद्देवि देवतादर्शनाय वै ॥ १७ ॥ धत्तूरस्य रसेनैव मारणार्थं लिखेत्तु वै ॥ प्रेतांगारेण विलिखेच्छत्रोरुच्चाटने सदा ॥ १८ ॥ विद्वेषणे तु विलिखेद्बिभीतकरसेन वै ॥ चंदनेन लिखेच्छांतौ विशेषः कथ्यते शृणु ॥ १९ ॥ अथ कार्यपरत्वेनांकमाह—एकेनांकेन यंत्रस्य भरणं साधकं परम् ॥ ददाति हनुमानद्धा दर्शनं सुखदायकम् ॥ २० ॥ युग्मेनांकेन भो देवि राजा वश्यो भवेन्नृणाम् ॥ तृतीयांकेन भरणे यंत्रं व्यापारलाभदम् ॥ २१ ॥ वेदांकेन भरेद्यस्तु शून्यं तच्छत्रुमंदिरम् ॥ पंचांकभरणं प्रोक्तं शत्रूच्चाटनकारकम् ॥ २२ ॥ वसुनंदरसैश्चैकेनेत्रवेदाग्निबाणकैः ॥ मुन्यश्वाभ्यां क्रमाद्धाम मारणे दुर्जने कृते ॥ २३ ॥ इन्दुश्च भौमो बुधजीवशुक्राः शनिश्च राहुः शिखिसूर्यकौ च ॥ एतांस्तु गत्या क्रमतो लिखित्वा यंत्रं नृपालं वशगं करोति ॥ २४ ॥ भौमेन्दुराहून् गुरुसौम्यकेतूंश्चार्कश्च शुक्रश्च शनिं क्रमेण ॥ विलिख्य यंत्रे युवतिश्च वंध्या अश्वैर्गजैर्मंत्रिगतैस्तु चाश्वैः ॥ २५ ॥ लिखित्वा यन्त्रवर्यं तं कण्ठे कट्यां च धारयेत् ॥ वंध्या वै लभते पुत्रं मृतवत्सा चिरायुषम् ॥ २६ ॥ वेदाग्निवसुभिश्चैव चन्द्रबाणग्रहैस्तथा ॥ नेत्रर्षिभी रसैश्चैव यंत्रं निगडभंजनम् ॥ २७ ॥ बाणर्षिमुनिनेत्रैश्च ग्रहैस्तद्वद्युगैस्तथा ॥ वह्निवसुस्वरूपैश्च ध्रुकष्टेन धनं लभेत् ॥ २८ ॥ अंगश्च सप्तद्विनवाब्धिभिश्च वेश्वा


नरैर्नागैसुधांशुबाणैः ॥ यन्मंत्रिगेर्भूपतिखेलधामैराकर्षणं मित्ररिपुप्रभूणाम् ॥ २९ ॥ शनिश्च राहुः शिखिचेन्दुजौ च गुरुश्च शुक्रो रवि
चन्द्रभौमाः ॥ अश्वैर्गतैर्मंत्रिगतैस्तथाश्वैरुच्चाटनं सर्वजनादिकानाम् ॥ ३० ॥ अथ कार्यपरत्वेन संख्यामाह ॥ दशवारं तु विन्यस्य लोक
संमोहनं भवेत् ॥ विंशत्यावर्त्य चैतद्धि सर्वाकर्षणकृद्भवेत् ॥ ३१ ॥ त्रिंशद्वारं तु कृत्वेदं पृथिव्यां जयमाप्नुयात् ॥ चत्वारिंशत्समारभ्य
शतांतं परमेश्वरि ॥ ३२ ॥ यः करोति महेशानि पुरश्चर्यायुतो नरः ॥ ३३ ॥ अयुतं विलिखेद्देवि बंदिमोचनकर्मणि ॥ अयुतद्वितयं कृत्वा
गतराज्यमवाप्नुयात् ॥ ३४ ॥ अयुतत्रितयं कृत्वा विजयी भुवि जायते ॥ शापानुग्रहसामर्थ्यं भवेद्वेदायुते शिवे ॥ ३५ ॥ बाणायुतप्रयोगेण
वाक्सिद्धिर्भवति ध्रुवम् ॥ रसायुतं लिखित्वा च जलमध्ये विनिक्षिपेत् ॥ ३६ ॥ जलक्षेपणमार्गेण पृथ्वीशं तु वशं नयेत् ॥ सप्तायुतं
लिखेद्देवि साक्षाल्लक्ष्मीपतिर्भवेत् ॥ ३७ ॥ अष्टायुतं लिखेद्देवि सिद्धकर्म समाप्नुयात् ॥ नंदायुतं लिखेद्देवि नवनाथसमो भवेत् ॥ ३८ ॥
लक्षमेकं लिखेद्यो हि शिवतुल्यो भवेत्स तु ॥ प्रत्यहं विलिखेद्यो हि शतं वा तत्तदर्धकम् ॥ ३९ ॥ एवं क्रमेण कथिता पुरश्चर्या प्रिये
मया ॥ एवं यः कुरुते मर्त्यस्तस्य सिद्धिर्भविष्यति ॥ ४० ॥ इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥४१॥ अथ कार्यपरत्वेन प्रयोग
माह—अथातः संप्रवक्ष्यामि विधिं यन्त्रस्य सिद्धिदम् ॥ लक्षं यंत्रं समालिख्य सिद्धपीठे शुभे दिने ॥ ४२ ॥ भूमिमध्ये शुद्धचित्तो भूमि
शायी जितेन्द्रियः ॥ हवनादि प्रकर्तव्यं सर्षपैर्घृततंडुलैः ॥ ४३ ॥ शर्कराभिश्रितैश्चैव वाक्सिद्धिः संप्रजायते ॥ देवरूपो भवेन्मर्त्यः सर्व
कामार्थसिद्धिदः ॥४४॥ दुःखदारिद्र्यरहितः सर्वपापैः प्रमुच्यते ॥ सर्वं चराचरं पश्येच्छतजीवी भवेन्नरः ॥४५॥ भूर्जपत्रे लिखेद्यंत्रं रोचना
गुरुकुंकुमैः ॥ समर्प्य पुष्पधूपादि जलमध्ये विनिक्षिपेत् ॥ ४६ ॥ रात्र्यंते लभते स्वप्ने वरं देवीसमीरितत् ॥ जीवन्मुक्तश्च भोगी च सर्वान्का
मानवाप्नुयात् ॥४७॥ देवदत्तं महावीर्यं पंचदशीयन्त्रकम् ॥ वीरप्रीतिकरं चैव लक्षजाप्ये कृते सति ॥ ४८ ॥ सबुग्धमाषं सतिलं शर्कराघृत
संयुतम् ॥ कृष्णपक्षे तु चाष्टम्यां बलिं दत्त्वा सुवारके ॥ ४९ ॥ वशे भवंति ते वीराः प्राणैरपि धनैरपि ॥ सर्वकर्माणि सिद्धानि भवंति नात्र

संशयः ॥५०॥ एकयंत्रसमालेखाद्यस्य कस्यापि कर्मणः ॥ क्षणमात्राद्भवेत्सिद्धिः सत्यं सत्यं न संशयः॥५१॥ पुनस्तावन्मितं लेख्यं वाह्वेबाज न होमयेत् ॥ देश्या जानपदा ग्राम्या दृष्टिमात्रेण किंकराः ॥५२॥ पुनस्तावन्मितं लेख्यं गर्ते शुद्धभुवि क्षिपेत् ॥ बीजं जपंस्तु तत्सर्वं पूरयेच्छुद्ध मृत्स्नया ॥ ५३ ॥ तदा सर्वमहीराज्यकर्ता हर्ता स्वयं प्रभुः ॥ अष्टौ महासिद्धयश्च तस्य हस्ततले स्थिताः ॥ ५४ ॥ बंधयेद्दक्षहस्ते तु लिखे द्रजासि पट्टके ॥ ततस्तं वामहस्तेन लुंयेबीजं च संस्मरन् ॥ ५५ ॥ पाशैश्च निगडैः सर्वैः सद्य एव विमुच्यते ॥ ५६ ॥ अथातः संप्रवक्ष्यामि प्रयोगं च महाद्भुतम् ॥ रवौ वारेऽर्कदुग्धेन स्मशानभस्मना लिखेत् ॥ ५७ ॥ यस्य वर्णस्य नामानि चितामध्ये विनिक्षिपेत् ॥ विक्षिप्तो जायते मर्त्यश्चाष्टोत्तरशतं जपेत् ॥ ५८ ॥ पंचदशं विलोमं च संध्याकाले विशेषतः ॥ यंत्रं च लिखितं सम्यग्बाहौ कंठे च धारयेत् ॥ ५९ ॥ राजापि वशमाप्नोति चान्यलोकस्य का कथा ॥ ६० ॥ चन्द्रवारे गृहीत्वा तु नागकेसररोचनम् ॥ सर्षपाणां तु तैलेन लिखेद्यंत्रं महोत्तमम् ॥ ६१ ॥ वर्तिका क्रियते यस्य चालयेन्मंत्रभावतः ॥ नृकपाले कज्जलं तु स्वंजनं मोहनं भवेत् ॥ ६२ ॥ गुरुवारे हरिद्राभ्यां सार्पिस्तगरुरोचनैः ॥ यंत्रराजं समालिख्य तस्य नाम च मध्यतः ॥ ६३ ॥ आसने निखनेच्चैव सर्वमाकर्षणं भवेत् ॥ ६४ ॥ अथातः संप्रवक्ष्यामि प्रयोगं महदद्भुतम् ॥ भृगुवारे सकर्पूरं वचाकुष्ठेन संलिखेत् ॥ ६५ ॥ लिखितं यंत्रराजं तु भूर्जपत्रे सुशोभनम् ॥ दृष्ट्वा स्त्री वशमाप्नोति प्राणैरपि धनैरपि ॥ ६६ ॥ शनिवारे चिताकाष्ठात्पंचदशे विलोमके ॥ लिखिते रिपुनाम्ना तु श्मशाने निखने द्भुवि ॥ ६७ ॥ कुक्कुटस्याक्षिरक्तेन म्रियते नात्र संशयः ॥ ६८ ॥ अथातः संप्रवक्ष्यामि यंत्रराजविधिं तव ॥ यस्मै कस्मै न दातव्यं गोपितं न प्रकाशयेत् ॥ ६९ ॥ वटवृक्षतले यंत्रं भूमिमध्ये ततो लिखेत् ॥ वटद्रुशाखालेखन्या कृष्णपक्षे चतुर्दशी ॥ ७० ॥ तत्रारंभं प्रकुर्वीत नरोऽत्यंतं समाहितः ॥ कृतेऽयुते धर्मकाममोक्षार्थान्प्राप्नुयाद्ध्रुवम् ॥ ७१ ॥ दाडिमीवृक्षलेखन्या भूमौ यंत्रसहस्रकम् ॥

१ वह्निबीजं १।

लिखितं बंधमोक्षादिकरं स्वामिवशंकरम् ॥ ७२ ॥ ब्रह्मवृक्षस्य लखन्यो यंत्रं पंचशतं लिखेत् ॥ भूमिमध्ये त दारिद्र्यनाशनं भवति ध्रुवम् ॥ ७३ ॥ मनःशिला च गोमूत्रं कर्पूरं तगरं तथा ॥ भूर्जे लिखेत्सहस्त्रं तदश्वत्थवृक्षमूलतः ॥ ७४ ॥ यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितम् ॥ प्राप्नोति विपुलान्भोगानिंद्रतुल्यो नरो भवेत् ॥ ७५ ॥ मनः शिलाबिल्वरसे हारिताले‌न यंत्रकम् ॥ बिल्वशाखासु लेखन्या सहस्त्रद्वितयं लिखेत् ॥ ७६ ॥ एकांते च शुभस्थाने भूमिमध्ये तथैव च ॥ वाक्सिद्धिर्जायते तस्य नान्यथा शंकरोदितम् ॥ ॥ ७७ ॥ अर्कपत्ररसेनैव अर्कपत्रे समालिखेत् ॥ अष्टोत्तरसहस्त्रं तु रिपुनामसमान्वितम् ॥ ७८ ॥ किंकरीवृक्षबंधेन ज्वरादिर्देहशूलकः ॥ जायते नात्र संदहो यदि शक्रसमो रिपुः ॥ ७९ ॥ हरिद्रालिखितं यंत्रं जलेनैव तु घर्षयेत् ॥ अष्टोत्तरशतं चैव मध्यपाषाण स्तंभनम् ॥ ८० ॥ रिपुद्वारे खनेद्भूमौ सिंहीकण्ठे तु यंत्रकम् ॥ कलहो जायते नित्यं भ्रातृपुत्रादिबंधनात् ॥ ८१ ॥ अपामार्गरसेनैव लिखेद्यंत्रं तु भूर्जके ॥ एकाह्निकस्तृतीयाख्यश्चतुर्थज्वरनाशनम् ॥ ८२ ॥ भृंगराजरसेनैव लिखेद्यंत्रं सुभूर्जके ॥ धारयेद्धृदये बाहा विवादे विजयो भवेत् ॥ ८३ ॥ अथ विषमांकपंचदशीविधानम्—दक्षिणामूर्तिरुवाच ॥ शृणुष्वावहिता भूत्वा गिरिजे प्राणवल्लभे ॥ अकथ्यं परमार्थेन तथापि कथयाम्यहम् ॥ ८४ ॥ विषमान्येकयंत्राणि कथ्यंते परमं शृणु ॥ नवकोष्ठात्मके यंत्रे द्वितीये सप्तमे तथा ॥ ५ ॥ रससंज्ञेऽथ नवमे पंचमे प्रथमे तथा ॥ चतुर्थे च ततीये च वसुसंज्ञे लिखेद्बुधः ॥ ८६ ॥ तिथ्यंकसंख्या जायेत षट्कर्माण्यत्र साधयेत ॥ सुदिने त्वष्टगंधेन होमपूजापुरःसरम् ॥ ८७ ॥ प्रारंभे नियताहारः कार्यगौरवलाघवात् ॥ लिखेत्सहस्त्रदशकं न्यूने त्वर्धार्धमानकम् ॥ ॥ ८८ ॥ त्रिसप्तदिनमध्ये तु कार्यसिद्धिर्न संशयः ॥ ८९ ॥ षष्ठाद्वा ह्यष्टमाद्वापि चतुर्थाद्वा लिखेत्सुधीः ॥ त्रिगुणं त्रिविभक्तं च नवकोष्ठेषु संलिखेत् ॥ ९० ॥ भूर्जे वा स्वर्णमुद्रायां लिखित्वा देहसंगतम् ॥ एतद्दर्शनमात्रेण नश्यंति यमकिंकराः ॥ ९१ ॥ बहुना किमिहोक्तेन प्रत्ययो ह्यस्य सूचकः ॥ लिखेत्सहस्त्रसंख्याकं जलेन तु विलेपयेत् ॥ बंदिमोक्षस्तदा देवि नात्र कार्या विचारणा ॥ ९२ ॥

त्रिकोणयन्त्रम्.



ग्रहशांतियन्त्रम्.

८	१ ह्रींरवये.	६
३	५	७
४	९	२

८	१	६	६	१	८
३	५	७	७	५	३
४	९	२	२	९	४

इदं त्रिकोणयंत्रं प्रथमं २–७–१–२–४–८–५–६–९–इति क्रमण पंचदशसहस्त्रं लेखनीयम् । तदा गोधूमपिष्टेन सह मत्स्येभ्यो दीयते चेत्सर्वसिद्धिः ॥ तथाच–लिखेत्प्राग्वज्जले क्षेपात्सहस्त्रातिथिसंमिताव् ॥ अभीष्टसिद्धयस्तस्य श्रीहस्ततलगोचरा ॥ ९३ ॥ अथ नवग्रहशांतियंत्रम्–रवौ दुष्टे प्रथमात् १ । सोमे दुष्टे द्वितीयात् २ । भौमे दुष्टे तृतीयात् ३ । बुधे दुष्टे चतुर्थात् ४ । गुरौ दुष्टे पंचमात् ५ । शुक्रे दुष्टे षष्ठात् ६ । शनौ दुष्टे सप्तमात् ७ । राहा दुष्टेऽष्टमात् ८ । केतौ दुष्टे नवमात् ९ ॥ एतत् क्रमपूर्वकं लेखनीयम् ॥ ह्रीं आदित्याय नमः ॥ इत्यादि सर्वेषां मध्ये ह्रींकारो लेखनीयः ॥ पिप्पलपत्रे वा सप्तपत्रपत्रे लिखित्वा पिप्पलमूले स्थापनीयम् ॥ एवमष्टाविंशतिदिनपर्यंतं कृते ग्रहाः प्रसन्ना भवंति पीडां न कुर्वंति ॥ ९४ ॥ अथ यंत्राणां वर्णभेदः–प्राच्यामारभ्य च पुनः पश्चिमायां समाप्यते ॥ सत्त्वयंत्रं तु विज्ञेयं विपरीतं तु तैजसम् ॥ ९५ ॥ दक्षिणस्यां समारभ्य सौम्यायां च समाप्यते ॥ वायवीयं भवेद्यंत्रं विपरीतं तु पार्थिवम् ॥ ९६ ॥ अनुलोमविलोमाभ्यां चत्वारोऽपि द्विधा द्विधा ॥ अष्ट भेदा भवंति स्म चतुर्वर्णा द्विभेदतः ॥ आद्ययंत्रं शिवमयं ह्यस्यास्ति महिमाऽद्भुतः ॥ ९७ ॥ इति पंचदशीविधानं समाप्तम् ॥ २ ॥

२	३	४	४	९	२
७	५	३	३	५	७
६	१	८	८	१	६

४	३	८	८	३	४
९	५	१	१	५	९
२	७	६	६	७	२

६	७	२	२	७	६
१	५	९	९	५	१
८	३	४	४	३	८

६	४८	१८
३६	२४	१२
३०		४२


अथ बहत्तरके यंत्रकी विधि ॥ प्राकृतग्रंथे-आम्रके **पट्टेपर रोली बिछाके अनारकी कलमसे** नव कोष्ठ बनावे उसमें अंक भरनेकी चाल इस प्रकार है-पहले ६-१२-१८-पुनः २४-३०-३६-पुनः ४२-४८-इस प्रकार अंकोंको भरे और एक कोठेको खाली छाड दे और प्रतिकोठेमें अंक भरनेके समय इस मंत्रका उच्चार करे ॥ मंत्रो यथा-ॐ पार्श्वनाथाय नमः ॥ इस प्रकार यंत्रको लिख पंचोपचार पूजन करके यंत्रके सम्मुख इस मंत्रको बहत्तर दफे जपे ॥ मंत्रो यथा-ॐ नमः कामदेवाय **महाप्र**भावाय ह्रीं कामेश्वरि स्वाहा ॥ पीछे यंत्रको मिटादे ॥ इस प्रकार चौवीस यंत्र नित्य लिखे चौवीसवे यंत्रके सम्मुख 'ॐ **नमः काम**देवाय महाप्रभावाय ह्रीं कामेश्वर स्वाहा ॥' इस मंत्रको इक्कीससौ जपे ॥ इस प्रकारसे बहत्तर दिन करे जौकी राटी बथुवाका अलुना साग भोजन करे पृथ्वीमें सोवे ब्रह्मचर्यसे रहे झूठ न बोले बहत्तर दिनके पीछे दशांश होम तर्पण मार्जन ब्राह्मणभोजन करावे तो यह यंत्र सिद्ध होजायगा ॥ पीछे इस सिद्ध यंत्रको कागजपर लिखकर उसके पाछे लिखे कि बहत्तर टके चलन बाजार द पीछे आसनके नीचे रखकर कामेश्वरीका मंत्र बहत्तरदफे जपे तो बहत्तर टके चलन

बाजार मिलेंगे वह किसीसे न बतावे क्योंकि कहनेसे टके मिलना बंद होजायगा टके आनेके बाद यंत्रको उठाकरें पागमें धरले दूसरे दिन गेहूंका आटा घृत खांडके साथ गोली बनाकर नदीमें बहावे ॥ यह विधि एक महात्मा जिसको इस यंत्रकी पूर्ण सिद्धि थी वह किसीसे कुछ नहीं लेते थे और खर्चका रुपया दो नित्य लगाते थे उन्होंका वचन है कि इस यंत्रके प्रतापसे ही हमारा निर्वाह होता है उन्होंने कृपा करके हमको प्रदान किया सो प्रकाश करता हूं ॥ और एक मुसलमान फकीरने इस यंत्रकी विधि इस तरहपर बताई कि मासके पहले बृहस्पतिसे प्रारंभ करके सूर्योदयपहेले कागजपर स्याहीसे बहत्तर यंत्र लिखे और आटा घृत खांडके साथ गोली बनालेवे और सूर्योदय होनेपर उन गोलियोंको लेकर नदीमें बहावे पीछे नाभिसमान जलमें खडा होकर पहले एकदफे 'बिस्मिल्लाहेर्रहेमानिर्रहेमानिर्रहीम' पढकर बहत्तरदफे 'अल्लहुम्मसल्लअलामुहम्मदिनवअलाआलमुहम्मदिनववारकवसल्लम' इस दारूदको पढे क्योंकि दारूदके पढनेसे पैगम्बर साहबकी मदत पहुँचती है पीछे पश्चिमाभिमुख खडा होकर चारहजार चारसौ चवाली४४४४ अथवा तीनहजार तीनसौ तेतीस ३३३३ बार 'याजिबोयाजिब्राईलवहकयावासितो' इस मंत्रको पढे अंतमें पुनः बहत्तरदफे दारूदको पढकर घरको चला आवे इस प्रकार बहत्तर दिनतक करनेसे यह यंत्र सिद्ध होजाता है ॥ पीछे इस सिद्ध हुए यंत्रको कागजपर लिखके बहत्तरदफे मंत्र पढे और तागेमें पिरोकर अपने दरवाजेपर टांगदियाकरे उसको दूसरे दिन उतारकर गोली बना नदीमें बहावे ऐसा नित्य करनेसे १८ दिनमें ही खर्चके माफिक कहींसे आता रहेगा बहत्तर दिनपीछे बहत्तर टके चलनबाजार आसनके नीचे आया करेंगे ॥ इति ॥ ३ ॥ अथ द्वात्रिंशांकयंत्रविधानम् ॥ इस यंत्रको हल्दीसे कागजपर लिखके नीचेके तरफ अपना मनोरथ लिखदे पीछे इस यंत्रको रुईके साथ बत्ती बनाकर रविवारको दीपकमें जलावे और हल्दीकी मालासे इस मंत्रको ग्यारहसौ जप ॥ तत्र मंत्रः—ॐ ह्रीं हंसः ॥ इस प्रकार सात रविवार करनेवाला मनुष्य सर्वदुःखोंसे मुक्त होकर अत्यंत सुखोंको भोगता है। इस यंत्रका दूसरा विधान इस प्रकार है कि रविवारको प्रातःकाल स्नान करके हल्दीसे थालीमें लिखे

८	१५	२	७
६	३	१२	११
१४	९	८	१
४	५	१०	१३

उसके ऊपर फूल बत्तीका चौमुखा दीपक स्थापन करके पंचोपचार पूजन करे हाथमें थालीको उठाले और सूर्यके सम्मुख खडा होकर 'ॐ ह्रीं हंसः ॥' इस मंत्रको जपे जैसे जैसे सूर्य फिरे उसी तरह आप भी फिरता जावे सूर्यके अस्त हो जानेपर अर्घ देकर मिष्टान्न भोजन करे पृथ्वीमें सोवे ब्रह्मचर्य पाले इसी प्रकार सात रविवार करनेसे ऐसा पृथ्वीमें कौनसा कार्य है जो सिद्ध नहीं हो सकता अर्थात् सूर्य नारायणकी कृपासे साधकके सम्पूर्ण कार्य्योंकी सिद्धि अवश्य होती है इसमें संदेह नहीं जानना । मैंने एक अत्यंत कठिन कार्यके वास्ते किया था सो चार ही रविवारोंमें वह कार्य सुगमतापूर्वक सिद्ध होगया ॥ ४ ॥ अथापदुद्धारबटुक

आपदुद्धारवटुकयन्त्रम्.




यन्त्रविधानम् ॥ श्रीपार्वत्युवाच–अधुना ब्रूहि मे नाथ आपदुद्धारनामकम् ॥ यंत्रं यन्त्रविदां श्रेष्ठ श्रोतुं मे लालसा बाढ॥ १ ॥ श्रीमहादेव उवाच ॥ समाधिध्यान योगेन परमेण महेश्वरि ॥ इदं वै यन्त्रकं दिव्यं प्रादुर्भावितमुत्तमम् ॥ २ ॥ स्वर्णे वा रजते न्यस्य धारयत् कण्ठदेशतः ॥ दक्षिणे वा तथा बाहावापत्तस्य हि नश्यति ॥ ३ ॥ भाषार्थ–श्रीपार्वतीजी प्रश्न करती है कि हे नाथ ! अब आप आपदुद्धारनामक यन्त्र कीर्तन करो मैं सुननेकी बडी इच्छा करती हूं आप यन्त्रोंके सागर हो ॥ १ ॥ श्रीमहादेवजी बोले हे परमप्रिये महेश्वरी ! हमने यह यन्त्र वडे समाधि और ध्यानके योगसे उत्पन्न करा है ॥ २ ॥ जो मनुष्य इस

यन्त्रको भोजपत्रके ऊपर लिखके सोना या चांदी या तांबेमें मढाय कर गले अथवा दाहिनी भुजामें बांधता है वह पुरुष सम्पूर्ण आपत्तियोंसे छटकर आनंद भोगता है ॥ ३ ॥ अथ हनुमान यंत्रविधानम् ॥ इस यन्त्रको कागज अथवा भोजपत्रपर सवा लाख लिखे तो उस लिखनेवालेपर हनुमान देव शीघ्र ही प्रसन्न होजाते हैं इसमें संदेह नहीं ॥ ॥ अथ सर्वकार्यसिद्धि कारकयन्त्रम् ॥ इस यन्त्रको भोजपत्रपर अष्टगंधसे लिख धूप दीप नैवेद्यसहित पूजन कर सोना चांदी अथवा तांबेमें मढाकर गले या दाक्षिण भुजामें बांधे तो सर्व कार्य सिद्ध होता है ॥ इस यन्त्रको शिवजी महाराजने पार्वतीजीसे कैलासपर्वतकी चोटीपर बठे हुए प्रकाश करा है और परीक्षा किया हुआ है ॥ ॥

हनुमानयन्त्रम्.

नं०	छं०	जं०	चं०
दं०	दं०	चं०	चं०
जं०	छं०	जं०	वं०
छं०	नं०	जं०	हुं०



फलवृद्धियन्त्रम् ।

वचनसिद्धियं.

६६	९३	२	८
७	३	९०	८९
९१	८६	९	१
४	६	८७	९८

पक्षिआकर्षणयं.

६१	६८	२	७
६	३	६२	६४
६७	६२	८	१
४	५	६२	६६

८७	९४	२	८
७	३	९१	९१
९३	८८	९०	१
४	६	८६	९२

दुष्टस्वप्ननाशकयं..

गं	छं	जं	चं
छं	नं	जं	ठं
ठं	जं	ठं	चं
नं	छं	जं	टं

बिच्छूसर्पादिनाशकयं.


३०	३७	२	८
७	३	३४	३३
३६	३१	९	१
४	५	३२	३४

इस वचनसिद्धियंत्रको कुलींजनसे भोजपत्रपर लिख मढाके कंठमें पहेरे तो शिवजीके प्रसादसे वचन सिद्ध हो ॥ ॥ इस पक्षिआकर्षणयंत्रको काष्ठके पट्टापर लिखे पीछे आसनपर रखे तो सब पक्षी अकस्मात् वहां आजावैंगे ॥ ॥ इस फलवृद्धियंत्रको जंभीरीके रससे कागज या भोजपत्रपर लिखके अनारके पेडमें बांधे तो फल बहोत आवेंगे और भी जिस वृक्षमें बांधोगे फल बहोत होंगे ॥ ॥ जिस स्त्री वा पुरुषको स्वप्नमें जंजाल दिखाई पडता हो वह दुष्टस्वप्ननाशकयंत्रको अष्टगंधसे भोजपत्रपर लिखके गूगलकी धूप देवे और कण्ठमें धारण करे तो निश्चय करके दुष्टस्वप्नका नाश होता है ॥ ॥ इस बिच्छूसर्पादिनाशक यंत्रको मालकांगनीके रससे भोजपत्रपर लिखके घरमें शुद्ध जगेमें धरदेवे तो सम्पूर्ण सर्प और बिच्छू उस घरको छोडकर भाग जायँगे ॥

इच्छाप्राप्तिकरकयं०

वं	वं	वं	वं
पं	पं	पं	पं
दं	दं	दं	दं
लं	लं	लं	लं

वृद्धियन्त्रम्.




राज्यकोपनिवारणयं०

ह्रीं	ह्रीं	ह्रीं	ह्रीं
ह्रीं	देवदत्त.		ह्रीं
ह्रीं	ह्रीं	ह्रीं	ह्रीं

इस इच्छाप्राप्तिकारकयंत्रको रक्तचंदनसे बेलपत्रपर १०८ लिखकर श्रावणमें दिन ३० शिवके लिंगपर चढावे तो शिवजी प्रसन्न होकर धनसम्पात्ति साहित सर्व भोगोंका अधिकारी बनादेते हैं ॥ ॥ इस वृद्धियंत्रको दिवालीकी रात्रिको लिख द्रव्य अथवा अन्नमें धरे तो वृद्धि होय ॥ ॥ इस राज्यकोपनिवारण यंत्रको भोजपत्रपर गोरोचन केसर चंदन अनामिकाका रुधिर मिलाकर लिखे पछि अनेक प्रकारके पुष्प मिष्टान्न और मांस द्वारा पजन करके यथाशक्ति कन्या और ब्राह्मणोंको भोजन करावे पीछे योगनीयोंको नमस्कार करके इस यंत्रको मुट्ठीमें दाबले और राजसभामें जावे तो तत्काल ही राजका क्रोध शांत होकर राजा वशीभूत होजायगा ॥


वैराग्योत्पत्तिकरंयन्त्रम् ।



इस वैराग्यापात्तिकर यंत्रको गोरोचन और चन्दनसे भोजपत्रपर लिखके लोहेके यंत्रमें बंद करके सिरपर रखे तो धीरे धीरे चित्तमें वैराग्य उत्पन्न होगा पुत्र मित्र धन स्त्रीसे मोह छुटकर योगीरूपमें इच्छा पूर्वक विचरेगा ॥

इस सेनापलायन यंत्रको शंखाहुली सूर्यमुखीगुल दोंनेके रससे नगाडेके ऊपर लिखे और डंकेकी चोट देवे तो सम्पूर्ण सेना भागजायगी ॥

सेनापलायनयन्त्रम् ।




शातलायन्त्रम्.

४२०००	४८०००	२०००	७०००
६०००	३०००	४६०००	४५०००
४०:०	५॥०००	४४०००	५॥०००
१०००	७०	१६	६०८

इस शीतलायन्त्रको अष्टगंधसे भोजपत्रपर लिखके सिरहाने धरे तो माताकी पीडा दूर होय ॥

मूँठउद्धारयन्त्र.



मूठोद्धारयन्त्रम्.



होलीकी रात्रिमें नग्न होकर धतर रससे यह मूँठउद्धारयंत्र भोजपत्रपर लिखे पीछे माथे बांधे तो मूठं लगे नहीं ॥ इस मूठोद्धारयन्त्रको मस्तकमें धारणकरे तो मूंठ लगे नहीं ।

नपुंसकयन्त्रम्.

४	५	७४	७७
७९	७२	८	१
६	३	७६	९५
७३	३८	२	७

गर्भस्तंभनयन्त्रम्.

१००	९१	२	७
६	३	८४	१०३
८००	११००	६	१०
४	५	१०२	८८

सौभाग्यवृद्धियन्त्रम्.

५	६	३	६
४	४	७	५
६	६	३	५
५	४	७	४

धरणियंत्रम् ।


६२३	१स	८६
७सी	५पू	३७
२म	९८	४स

पुत्रोत्पत्तियंत्रम् ।


१०	१	१२
८	१५	३
२	२	५

इस नपुंसकयंत्रको नामरद लिखके कटिमें बांधे तो मरद होवे ॥ ॥ इस गर्भस्तंभनयंत्रको कमरमें बांधे तो गर्भ थंभे ॥ ॥ इस सुहाग वृद्धि यंत्रको माथेमें राखे तो सुहाग बधे ॥ ॥ इस धरणियंत्रको कमरमें बांधे तो धरणि ठिकाने आवे ॥ ॥ वंध्या स्त्री इस पुत्रोत्पत्तियंत्रको कमरमें बांधे तो पुत्रप्राप्ति होय ॥


रोजीप्राप्तियंत्रम्.




पुरुषवश्ययन्त्रम्.



श्वानविषयन्त्रम्.



डाकिनीयंत्रम्.



इस रोजीप्राप्तियंत्रको शुक्लपक्षमें कांस्यपात्रपर लिखकर पास राखे तो रोजगार मिले ॥ ॥ इस पुरुषवश्य यंत्रको स्त्री गलेमें राखे तो पुरुष वश्य होय ॥ ॥ इस श्वानविषयंत्रको माथेमें राखे तो हडकाये कुत्तेका जहर दूर होय ॥ ॥ इस डाकिनी यंत्रको पास राखे तो डाकिनीका भय होवे नहीं ॥

कामलायन्त्र.




अश्वकष्टनि० यंत्रम्.

६	७	२
१	५	९
८	३	४

आकर्षणयंत्रम्

१९	२६	३	८
७	२	२३	२२
२५	२०	९	१
४	६	२१	२४

वायगोलायन्त्र ।



इस कामलायंत्रको अष्टगंधसे भोजपत्रपर लिख माथे बांधे तो पीलियो दूर होवे ॥ ॥ घाडका पेशाज बंद हो जाय पेटमें दर्द चले तो इस अश्वकष्टनिवारणयंत्रको लिखकर घोडेके गलेमें बांधदे तो सर्व कष्ट दूर होय । शतानुभतम् ॥ ॥ इस आकर्षण यंत्रको सेहकी शूलसे नित्य एकसौ आठ लिखे तो परदेश गया घर आवे ॥ ॥ इस वायुगोला यंत्रको कागजपर लिखके रविवारके दिन सूर्यके सन्मुख पानीमें धोकर पीवे तो तत्क्षणात् वायगोला जाता रहे ॥

दृष्टियंत्रम्.



कर्णपीडायंत्रम्.

भ	ज	व
क	ग	जः
छः	छः	दः

आधाशीशीयंत्रम्.

५३	४२
३११	७०

इस दृष्टियंत्रको कागजपर अष्टगंधद्वारा लिखके गलेमें बांधे तो नजर दूर होय पीछे कभी नहीं लगे इस दृष्टियंत्रका बडा विलक्षण प्रभाव है ॥ ॥ कागजपर स्याहीसे लिख यह कर्णपीडायंत्र कानमें बांध तो निश्चय पूर्वक कानकी व्याधी झटपट दूर हो जायगी यह यंत्र कर्णपीडाके वास्ते रामबाण है ॥ ॥ इस आधाशीशी यंत्रको कागजपर स्याहीसे लिखकर मस्तकमें बांधे तो निश्चयपर्वक आधाशीशी नष्ट हो जाय यह यंत्र गुप्त था ॥

इति श्रीमंत्रमहार्णवे उत्तरखण्डे यंत्रप्रकरणे एकादशस्तरङ्गः ॥ ११ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ अथ मिश्रतंत्रप्रारंभः ॥ तत्रादौ अंकोलतंत्रम् ॥ दत्तात्रेयतंत्रे–गृहीत्वांकोलबीजानि रविवारे सुनिश्चितम् ॥ शृणु सिद्धिं महायोगिन् बीजानां कल्पमुत्तमम् ॥ १ ॥ अंकोलबीजं निक्षिप्तं गुरौ गजमुखे शुभम् ॥ मंत्रेण सिंचेन्नित्यं हि यावद्बीजफलोद्भवः ॥ २ ॥ त्रिलोहवेष्टितं कृत्वा एकबीजं मुखे स्थितम् ॥ मत्तमातंगवीर्यस्तु वायुतुल्यपराक्रमः ॥ ३ ॥ हयमखे च तद्बीजं रविवारे सुनिक्षिपेत् ॥ जायंते सफला वृक्षास्तद्बीजं ग्राहयेत्पुनः ॥ ४ ॥ त्रिलोहे वेष्टितं कृत्वा मुखमध्ये च धारितम् ॥ महाबलो महातेजाः प्रतीक्ष्यश्च तुरंगमः ॥ ५ ॥ वृषमुखे तु तद्बीजं निक्षिपेद्भुवि निश्चितम् ॥ तद्बीजं मुखमध्यस्थं त्रिलोहवेष्टितं कुरु ॥ ६ ॥ महद्बलं महत्तेजो जायते वृषभस्य च ॥ मृगमुखे च तद्बीजं निक्षिपेद्भूतले ध्रुवम् ॥ ७ ॥ त्रिलोहवेष्टितं बीजं मृगराजसमो भवेत् ॥ तद्बीजं सिंहवदने निक्षिप्तं च महीतले ॥ ८ ॥ त्रिलोहवेष्टितं बीजं मुखमध्ये च धारितम् ॥ महाबलो महातेजा जायते सिंहरूपकः ॥ ९ ॥ शुनो मुखे तु तद्बीजं निक्षिपेद्भूतले ध्रुवम् ॥ त्रिलोहवेष्टितं कृत्वा मुखे क्षिप्त्वा तु श्वानकम् ॥ १० ॥ मयूरमुखमध्यस्थं तद्बीजं भुवि निक्षिपेत् ॥ त्रिलोहवेष्टितं कृत्वा मयरो दृश्यते जनैः ॥ ११ ॥ यानि कानि च बीजानि जंगमस्थलमेव च ॥ अंकोलबीजं निक्षिप्तं मुखे भूमितले ध्रुवम् ॥ १२ ॥ तद्बीजं मुखमध्यस्थं त्रिलोहवेष्टितं कुरु ॥ तद्रूपश्च भवेत्सत्यं नान्यथा शंकरोदितम् ॥ १३ ॥ अंकोलस्य तु बीजानि तत्तैलं ग्राहयेत्पुनः॥ धूपं दत्त्वा तु तत्तैलं सर्वसिद्धिप्रदायकम् ॥ १४ ॥ पद्मबीजे लिपेत्तैलं निक्षिपेच्च तडागके ॥ तत्क्षणाज्जायते चित्रं तत्क्षणात्कमलोद्भवः ॥ १५ ॥ तत्तैलं चूतबीजे तु निक्षिपेद्बिंदुमात्रतः ॥ जायंते सफला वृक्षा नान्यथा शंकरोदितम् ॥ १६ ॥ यानि कानि च बीजान्यंकोलतैलेन लेपयेत् ॥ जायंते सफला वृक्षाः सिद्धयोग उदाहृतः ॥ १७ ॥ शवानने बिंदुमात्रं तत्तैलं निक्षिपन्नरः ॥

---

१ मंत्रो यथा–ॐ नमो नारायणाय विश्वंभराय इन्द्रजालकौतुकानि दर्शयदर्शय सिद्धिं कुरु कुरु स्वाहा ॥ इति मंत्रेण सर्वं कुर्यात् ॥ २ ॥ त्रिलोहं यथा–दश हेम द्विषट् ताम्रं षोडशं रौप्यभागकम् ॥ एवं संख्या त्रिलोहस्य ज्ञातव्या सर्वकर्मणि ॥ ३ तैलपातनम्–बीजोंको चूर्ण करके आकके कच्चे पत्तोंके रसकी सात भावना देवे पीछे धूपमें धरनेसे निःसंदेह तेल निकलता है–इसीप्रकार इन्द्रायणक्वाथकी पुट देनेसे भी निकल आता है ॥ अन्यत्–निस्तुष अंकोलके बीजोंका मुख किंचित् घसकर कांसीके पात्रमें धरे और उन्होंपर चनेके चूनका लेप करके उसके मुखपर कुछ कुछ सुहागेका लेप करे पीछे उन्होंको घाममें धरनेसे सुखपूर्वक तेल निकल आता है ॥

एकयामं सजीवः स्यान्नान्यथा शंकरोदितम् ॥ १८ ॥ पत्रं तु श्वेतगुंजायाः प्रथमं भक्षयेन्नरः ॥ अंकोलतैललिप्तांगो दृश्यते राक्षसाकृतिः ॥ १९ ॥ पलायंते नराः सर्वे पशुपक्षिमृगादयः ॥ अंकोलस्य तु तैलेन दीपं प्रज्वालयेन्नरः ॥ २० ॥ रात्रौ पश्यति भूतानि खेचराणि महीतले ॥ अंकोलतैललिप्तं च शस्त्रं यानि च कानि च ॥ २१ ॥ भवंति मूर्च्छिता दृष्ट्वा तत्रैव च महीतले ॥ रणे दारुणशस्त्रौघं दृष्ट्वैव हि पलायते ॥ २२ ॥ नरादिजीवजातं वै नान्यथा शंकरोदितम् ॥ २३ ॥ अंकुलीतैलसंसिक्ता वचा सप्तदिनावधि ॥ त्रिलोहे वेष्टिता तस्या गुटिकां कारयेत्ततः ॥ २४ ॥ अदृश्यकारिणी ख्याता मुखस्था नात्र संशयः ॥ तत्तैलैः सर्षपाञ्छुद्धांस्त्रिलोहेन च वेष्टितान् ॥ २५ ॥ गुटिका मुखमध्यस्था ख्याताऽदृश्यत्वकारिणी ॥ चूर्णपद्मकपत्राणां सुरभीपत्रसंयुताम् ॥ २६ ॥ धत्तूरस्वरसे पिष्ट्वा गुटिकां कारयेद्दृढाम् ॥ सा लिप्तांकुलोतैलेन मुखस्थाऽदृश्यकारिणी ॥ २७ ॥ काकोलूकस्य पक्षांश्च निजकेशांस्तथैव च ॥ अंतर्धूमगतं दग्ध्वा सूक्ष्मचूर्णं तु कारयेत् ॥ २८ ॥ अंकोलतैलाद्गुटिकां कृत्वा शिरसि धारयेत् ॥ अदृश्या जायते क्षिप्रं देवैरपि न दृश्यते ॥ २९ ॥ तालकं कृष्णमहिषीक्षीरमंकोलतैलकम् ॥ तल्लिप्तांगो नरोऽदृश्यो जायते शंकरोदितम् ॥ ३० ॥ अंकोलतैलसंसिक्तं मलं पारावतोद्भवम् ॥ ललाटे तिलकं तेन कृत्वाऽदृश्यो भवेन्नरः ॥ ३१ ॥ अथ ब्रह्मवृक्षश्वेतपालाशतंत्रम्—अथातः संप्रवक्ष्यामि ब्रह्मवृक्षस्य कल्पनम् ॥ शृणु वत्स विधिं तस्य ब्रह्मवृक्षस्य यत्फलम् ॥ १ ॥ दारिद्र्यदुःखनिर्यासे नराणां बुद्धिवर्द्धनम् ॥ तस्य पुष्पाणि संगृह्य सूक्ष्मचूर्णं तु कारयेत् ॥ २ ॥ अजाक्षीरेण तद्भाव्यं त्रिवारं च पुनः पुनः ॥ वंगस्य षोडशांशेन प्रतितापं तु कारयेत् ॥ ३ ॥ तद्वंगं शोध्य नागेन पुनस्तेनैव धार्यते ॥ जायते शोभनं तारं शंखकुंदसमप्रभम् ॥ ४ ॥ तस्य वृक्षस्य पुष्पाणि तद्रसे भाव्य तारकम् ॥ त्रिंशांशं वेधयेद्वंगं तेन तारं च नान्यथा ॥ ५ ॥ हिमकुंदेंदुसदृशमष्टदोषविवर्जितम् ॥ जायते नान्यथा वत्स भक्तियुक्तस्य तच्च त ॥ ६ ॥ ब्रह्मवृक्षफलं दृष्ट्वा गंधकं भाव्य यत्नतः ॥ शुक्रपत्रप्रलेपेन पुटेनैकेन कांचनम् ॥ ७ ॥ तस्य वृक्षस्य तैलेन भावयेद्रसगंधकम् ॥ नाम हेम भवत्याशु द्वात्रिंशन तु वेधयेत् ॥ ८ ॥ शाव्यभवनमध्ये तु कर्तव्यं त यथोचितम् ॥ तत्फलस्य रसेनैव स्वर्णं भवति निश्चितम् ॥ ९ ॥

पत्रमेकं पलाशस्य गर्भिणीपयसान्वितम् ॥ ऋत्वंते तानि पीतानि वंध्या भवति गर्भिणी ॥ १० ॥ अथ रक्तगुंजातंत्रप्रारंभः ॥ प्राकृतग्रंथे-शिव उवाच॥ गुंजाकल्पं प्रवक्ष्यामि गिरिजे शृणु यत्नतः ॥ कल्पानां सारभूतोऽयं नाना कौतुकरूपवान् ॥ ॥ १ ॥ भूतप्रेतपिशाचादिशाकिनीडाकिनीगणः ॥ यक्षभैरववेताला गुंजाकल्पे निगद्यते ॥ २ ॥ कथयामि चरित्रं ते कल्पानां समुदायिकम् ॥ क्रियते साधकैर्यद्वत् तत्तत्सिद्धं भवेद्ध्रुवम् ॥ ३ ॥ शिवानंदकरी विद्या रक्तगुंजातिगुततः ॥ गुरुणा भेदं संग्राह्य साधयेत्कल्पमुत्तमम् ॥ ४ ॥ उपदेशं प्रवक्ष्यामि यथा साधनकर्मणि ॥ कश्चिन्न चोनं भवति तदा सिद्ध्यति नान्यथा ॥ ५ ॥ रवौ पुष्ये कुजे[1] शुक्रे अनकले ग्रहे सति ॥ कृष्णाष्टम्यां हस्तऋक्षे चतुर्दश्यां तु स्वातिभे ॥ ६ ॥ पूर्णा शतभिषा युका निशीथे मूलमुद्धरेत् ॥ गहीत्वा गृहमागत्य निस्संदेहमनाः सुधीः ॥ ७ ॥ दुग्धेन स्नापयेत्पश्चाद् धूपदीपादिकं ततः ॥ सिद्धं भवति तन्मूलं काम्यकर्मणि योजयेत् ॥ ८ ॥ नारीनराणां सर्पादिविषभंजनकारणम् ॥ पीत्वा सुखतरं यांति नात्र कार्या विचारणा ॥ ९ ॥ तेनैव घर्षितं भाले तिलकं यः समाचरेत् ॥ सभायां मानमाप्नोति बहुमानो भवेत्तदा ॥ १० ॥ मन्यंते तद्वचः सत्यं सभायां संस्थिता नराः ॥ गुंजाकल्पप्रभावेन नरं नारीं च नर्तयेत् ॥ ११ ॥ कज्जलेन समं पिष्ट्वा नरेण क्रियतेऽजनम् ॥ जगन्मोहनमायाति दृष्ट्वा साधकमुत्तमम् ॥ ॥ १२ ॥ गालिं दत्वाऽनु तस्यैव न त्यजंति नराः क्वचित् ॥ यस्मै कस्मै न दातव्यं सिद्धयोग उदाहृतः ॥ १३ ॥ बिल्वपत्ररसे घृष्ट्वा नयने तेन चांजयेत् ॥ दृष्टिं प्रसारयेद्यत्र तत्र भूतं च पश्यति ॥ १४ ॥ बिल्वार्कैर्यस्तु तिलकं कुर्यात्साधकसत्तमः ॥ भूतप्रेतपिशाचादि ध्रुवं नश्यति दर्शनात् ॥ १५ ॥ शिवलिंगीरसे पिष्ट्वा लेपं कुर्यात्तु यो नरः ॥ भूतप्रेतपिशाचादि दृष्ट्वा रूपं पलायते ॥ १६ ॥ अजामूत्रेण पिष्ट्वा वै करलेपं तु कारयेत् ॥ दूरवार्तां वदेत्तस्य यक्षिणी सहचारिणी ॥ १७ ॥ मधुना योंऽजनं कुर्याद्वेतालं पश्यति ध्रुवम् ॥ यं यं प्रार्थयते कामं वेतालोऽस्मै प्रयच्छति ॥ १८ ॥ दुग्धसंगेन घृष्ट्वा च लेपनं कुरुते बुधः ॥ भूतप्रेतपिशाचाश्च यक्षाश्च योगिनीगणाः ॥

१ कजो रोहिणी।

